# भट्टारकदेवशक्रविरचितप्रतापकाव्यस्य षड्विंशतिसर्गस्य सम्पादनमध्ययनञ्च

**डॉ. शशिकुमारशर्मा**

**समीक्षात्मकभागः**

शास्त्राणामध्ययनमध्यापनं तदैव अतीव सुकरं भवति यदा तच्छास्त्रस्यानुकूला पद्धतिराश्रीयते। नैकविधानां गद्यपद्यव्याकरणादीनां नाना शास्त्राणां साहित्यव्याकरणदर्शनादीनां पाठनं कथं वा करणीयमिति विषये शिक्षाविधाः प्राचीनार्वाचीनशिक्षणपद्धतीर्विमर्श्य निर्दुष्टरूपेणानुकूलपद्धतयः निरूपिताः।

अत एव प्राचीनार्वाचीनशास्त्राणां पूरकशास्त्रं शिक्षाशास्त्रमिति विदुषामभिप्रायः। कः विषयः, कया पद्धत्या पाठनीयम्, कया पद्धत्या नाध्यापनीयम् इति प्रवृत्तिनिवृत्तिजनकत्वात् शिक्षाशास्त्रस्य शास्त्रत्वं सिद्धम्। वस्तुतः शिक्षाशास्त्रिणः विषयानुकूलां पद्धतिं पाठयन्ति। यथा साहित्यशास्त्रस्य टीकापद्धतिः, व्याकरणस्य आगमन-निगमनपद्धतिः, पद्यस्य अन्वयविधिरिति। अस्मिन्नेव क्रमे संस्कृतशिक्षणे मया एका नूतनपद्धतिराश्रिता। का सा नूतनपद्धतिः, सा आकाङ्क्षापद्धतिः। आङ्-उपसर्गपूर्वककाङ्क्षिधातोः अच्-टाप्प्रत्यययाभ्याम् आकाङ्क्षा इति शब्दो निष्पद्यते। अपेक्षा, जिज्ञासा, अनुसन्धानम् इत्याद्यर्थेषु शब्दोऽयं प्रयुज्यते। सांख्यकारिकाव्युत्पत्तिवादवाक्यपदीयसदृशदुरुहविषयाणामपि आकांक्षापद्धत्या अध्यापनं भवितुं शक्यते, तेन शिष्याः समीचीनरीत्या अवगन्तुं शक्नुवन्ति।

शिक्षामनोविज्ञानानुसारं सर्वेष्वपि स्तरेषु प्रायः कण्ठस्थीकरणं निरस्तमभवत्। अत्र प्रश्नोत्तरपद्धत्या अध्यापनसमये आकाङ्क्षायाः आधारभूतं पदं कारिकायाः निष्कास्य तदाधारेण प्रश्नं पृच्छति। शिक्षार्थिनः तस्य प्रश्नस्य उत्तरं कारिकायां प्रयुक्तपदाधारेणैव ददाति। एवमासान्तं कारिकां पाठयति। वारं वारं कारिकायां विद्यमानानां पदानां प्रयोगेण तत्तत्पदानाम् उच्चारणाभ्यासो भवति। तथा च विना कण्ठस्थीकरणेन कारिकां स्मरति। सांख्यकारिकायाः कारिकाणां पाठनम् आकाङ्क्षापद्धत्या कथं वा करणीयम् , येन छात्राः अल्पश्रमेण अधिकविषयज्ञानं प्राप्नुयुः।

महाभाष्येऽपि आकांक्षापद्धत्या अध्यापनं वर्तते इति दृश्यते। प्रश्नोत्तरमाध्यमेन आकांक्षापद्धतिराश्रिता। यथा – अथ शब्दानुशासनम्। शास्त्रमधिकृतं वेदितव्यम्। केषां शब्दानाम् लौकिकानां वैदिकानाञ्च।

शोधावसरे भारतदेशस्याप्रकाशितमनुद्घाटितमस्पृष्टं ज्ञानरूपमातृकाणां स्थितिं ज्ञात्वा तासां प्रकाशनार्थं मया प्रतिज्ञा कृता। अत एव मत्प्रतिज्ञापूरणांशत्वेन अप्रकाशितपाण्डुलिपिमाश्रित्य शोधकार्यमिदं प्रचलति। अस्मिन्नेव क्रमे अप्रकाशितमातृकायामपि आकाङ्क्षापद्धतिः आसीत् वा न वा इति, किं प्राचीनकालेऽपि आकाङ्क्षापद्धत्या पठनपाठनं भवति वा इति च मनसि प्रश्नः जातः। अप्रकाशितमातृकासु अन्वेषणं कृतम्। इमं विधिमाश्रित्य भट्टारकदेवशक्रमहोदयेन प्रतापकाव्यं रचितम्।

**मातृकायाः सामान्यपरिचयः –**

अस्य ग्रन्थस्य एका मातृका जयपत्तनस्थजैनदिगम्बरप्राकृतापभ्रंशसाहित्याकादमिग्रन्थालये विद्यते। अस्याः मातृकायाः प्रतिकृतिः ग्रन्थस्यास्य सम्पादनाय स्वीकृता।

**ग्रन्थस्य सामान्यपरिचयः -**

अस्मिन् ग्रन्थे द्वात्रिंशद्सर्गाः सन्ति। अत्र ग्रन्थकारेण शिखरिणीवृत्तबद्धश्लोकस्य आकाङ्क्षापद्धत्या व्याख्यानं विहितम्। अस्मिन् श्लोके भगवतः श्रीरामचन्द्रस्य प्रतापविषयः वर्णितः। अत्र प्रथमं तु मङ्गलाचरणं तत्पश्चात् प्रतापकाव्यस्य विषये लिखितम्। अस्य ग्रन्थस्य सम्पादितेकैकस्य सर्गस्य पत्रिकायां प्रकाशनं भवेत् इति मनसि निधाय सुधियां स्वान्तमावर्जयेत्तर्हि मन्ये सफलोऽयं मे प्रयास इति। प्रथमद्वितीयतृतीयचतुर्थपञ्चमसर्गाणां प्रकाशनं जातम्। इदानीं मया षष्ठमसप्तमाष्टमनवमदशमसर्गाणां वर्णनं सम्पादनञ्चात्र क्रियते। यद्यपि प्रथमसर्गादारभ्य पञ्चमसर्गपर्यन्तं अन्यपत्रिकायां प्रकाशनं जातं तथापि अत्र परिशिष्टे प्रकाशितप्रथमसर्गादारभ्य पञ्चमसर्गपर्यन्तसम्पादितभागस्यापि प्रकाशनं क्रियते। येन ग्रन्थस्य सम्पूर्णस्वरूपमेकत्रैव स्यादिति। अन्यसर्गाणामपि प्रकाशनमस्यामैव पत्रिकायां भविष्यति।

अत्र लेखकेन प्रथमसर्गे रामवाचकपक्षः स्थापितः। द्वितीयसर्गे कृष्णवाचकपक्षः स्थापितः। तृतीयसर्गे शिववाचकपक्षः स्थापितः। चतुर्थसर्गे ब्रह्मावाचकपक्षः स्थापितः। पञ्चमसर्गे सूर्यदेववाचकपक्षः स्थापितः। षष्ठमसर्गे शंवाचकपक्षः स्थापितः। सप्तमसर्गे शिवधर्मपक्षः स्थापितः। अष्टमसर्गे गणेशवाचकपक्षः स्थापितः। नवमसर्गे हनुमान्वाचकपक्षः स्थापितः। दशमसर्गे कर्त्तावाचकपक्षः स्थापितः। यथा कर्त्ता नैयायिकाणां यथा वेदातिकानां ब्रह्मा तथैव मीमांसकानां कर्मसकलविधिकरो भवतीति भावः। एवमेकादशसर्गे मीमांसकपक्षः स्थापितः। द्वादशसर्गे बौद्धमतपक्षः स्थापितः। त्रयोदशसर्गे ऋषभदेवपक्षः स्थापितः। चतुर्दशसर्गे जगच्छिरोमणिपक्षः स्थापितः। पञ्चदशसर्गे श्यामप्रभपक्षः स्थापितः। षोडशसर्गे आशीर्वादपक्षः स्थापितः। सप्तदशसर्गदारभ्य द्वात्रिंशद्सर्गपर्यन्तं द्व्यक्षरं स्वीकृत्य चित्रालङ्कारमाध्यमेन व्याख्यानं कृतं लेखकेन। सप्तदशसर्गे लक्ष्मीपक्षः स्थापितः। अष्टादशसर्गे जयसिंहभूपपक्षः स्थापितः। विंशतितमे सर्गे श्रृङ्गाररसप्राधान्यपक्षः स्थापितः। एकविंशतितमे सर्गे वाक्यमहिमाधिकारपक्षः स्थापितः। द्वाविंशतितमे सर्गे अस्य काव्यस्य पण्डितपक्षः स्थापितः। त्रिविंशतितमे सर्गे कृष्णप्रतापश्लेषपक्षः स्थापितः। चतुर्विंशतितमे सर्गे वैदनाथशिवपक्षः स्थापितः। पञ्चविंशतितमे सर्गे रोगहानिपक्षः स्थापितः। षड्विंशतितमे सर्गे सुखपक्षः स्थापितः।

अनया रीत्या द्वात्रिंशत् सर्गे स्वकल्पनया आकांक्षापद्धत्या भिन्नभिन्नवाचकपक्षाः स्थापिताः।

**सम्पादनभागः**

**श्रीगणाधिपतये नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।**

**स जयति परमात्मा यस्य लोको हि मग्नो**

**मननवरसमुद्रे कृष्णिकावद्विभाति।**

**त्रिभिदरमुदरेयं खेंशुमव्वाहिके वा**

**मणिरिव शुभरत्नं रोहणाद्रौ यथा वा।।1।।**

**गुरुपदकमलं प्रणौमि भक्त्या**

**हृदि मयि सततं करोमि शक्त्या।**

**ऋजुमनवचनैः स्तवीमि सूक्त्या**

**नततनुशिरसा यवीमि युक्त्या।। 2।।**

**यस्याः प्रसत्तेर्गुणरत्नखानेर्जडार्थदात्र्यासु पदार्थपात्र्याः।**

**विशालबोधाः प्रभवन्त्यबोधाः प्रणौमि तां तत्प्रभुवक्त्रजाङ्गाम्।।3।।**

**प्रतापकाव्यं रचयामि कामधेन्वाख्यकं षोडशवृत्ततो वै।**

**एकेन काव्येन तथैव युग्मपक्षेन भिन्नैः रसपङ्क्तिवृत्तैः।।4।।**

भूपेन्द्रवृत्तं जगति प्रसिद्धभाषासु चेच्छिलष्टतरं भवेद्वै।
तत्संस्कृते किं बहुभिस्सदर्थैः क्लृप्तं मनोहारि सतां भवेन्न।।5।।
एकार्थतो यत्र भवेद्द्वितीयोऽप्यर्थोऽत्र चित्रप्रदमेव लोके।
काव्ये पुनर्यत्र युगत्रिपक्षार्थाः किं न युक्तं गुणिनां मुदे तत्।।6।।
अर्थप्रकाशोऽत्र न चास्ति विज्ञाष्टीकां विना वाध्ययनादृतेऽपि।
एकाक्षरीकोषसुशब्दयुक्त्या विमर्शनीयः स्पृहया विनाहो।।7।।
मादर्यवन्तोऽत्र भवेयुरस्य विज्ञा वयं किं पठनेन वित्त।
राजेन्द्रचेतो हरकं तदेतत्सदर्थसारं न परं कदर्थम्।।8।।
कवीन्द्रमाना नृपतेः सभायां काव्यं पठन्तु[1] परमादरेण।
परं सुखं नास्ति परत्र विज्ञाः प्रतापकाव्यस्य विमर्शनात्तत्।।9।।
क्व सूर्यवंशप्रभवो नृपोऽसौ क्व चात्र बुद्धिर्मम दुर्बलार्था।
तथापि राजेन्द्रगुणा बलान्मां वाचाल्यते चूतपिकेव चैत्रे।।10।।
सन्त्येव सन्तो भुवि ये गुणेषु पराः परेषां ग्रहणेषु गृध्राः
प्रयोजनं तेऽपि विना धरित्र्यां जीयासुरत्रापरकृत्य विज्ञाः।।11।।
जीयासुरन्येऽपि हि दुर्जनाख्याः निष्कारणं ये परदोषगृध्राः।
येषां भिया न स्खलते[2] सतां धीरहो महानेष मतो गुणो मे।।12।।
नाना कवित्वेषु चणास्तथापि
प्रतापकाव्यं वदनेषु यूयम्।
ताम्बूलवत्कृत्य नृपस्य गोष्ठ्यां
विशंतु विज्ञाः कुपमुन्मनाश्चेत्।।13।।
यथापरे मिष्टतराः सिताऽग्रे विभान्ति लोके हि कथापरा वा।
रामायणीभागवतीकथाऽग्रे काव्यानि विश्वानि तथैतकाग्रे।।14।।
इदं प्रबन्धं विरचय्य पूर्वं सूत्रं प्रवक्ष्ये प्रथमं हि तस्य।
द्वात्रिंशदर्थप्रसरप्रदस्य काव्यस्य स्वोपज्ञविनिर्मितस्य।।15।।

इति पीठिका।

।। षड्विंशतितमः सर्गः।।

काव्यः -

प्रतापेट्शं प्रतापेट्शं प्रतापेट्शं प्रतापेट्शम्।
प्रतापेट्शं प्रतापेट्शं प्रतापेट्शं प्रतापेट्शम्।
प्रतापेट्शं प्रतापेट्शं प्रतापेट्शं प्रतापेट्शम्।

[1] पठन्तू इति मातृकायां पाठः।
[2] सवलते इति मातृकायां पाठः।

**प्रतापेट्शं प्रतापेट्शं प्रतापेट्शं प्रतापेट्शम्।**

**अस्यार्थः –** हे प्रतापेट् हे प्रतापसिंहराजन्। ते इति शेषः। तव शम् इति सुखं भवतु इति शेषः।

1. **कथं भूतं शं प्रतापेट् शम्।**

प्र इति नियोगस्तेन तापा इति तापयुक्ताश्च ते ईशा इति राजानस्तेषां शम् इति शोकं यस्मात्तत् प्रतापेट्शम्। अर्थात् सेवानियोगेन शत्रुभूपालानां संतापाच्छोकोत्त्पत्तिस्तदुखसुखमिति भावः।

2. पुनः कथं भूतं शम्। प्रतापेट्शं प्र इति वियोगस्तेन तापाः ता पिता ये ईशा राजानस्तेषां शा इति स्तश्चाफलगुच्छाः। अथवा तेषां शत्रुनृपस्त्रीणाम् आभरणगुच्छा यस्मिन् तत् प्रतापेट् शम् अर्थात् वियोगयुक्तम्लीनशत्रुनृपवनवृक्षफलभारच्छेदनोत्थसुखम्। अथवा। तेषां शत्रुनृपस्त्रीणां स्वधववियोगेन आभरणगुच्छा त्यक्त्वास्तदुखं सुखं वा इत्यर्थः।
3. पुनः कथं भूतं शम् प्रतापेट् शं प्र इति अतिशयार्थे। अतिशयेन तापा इति स्तापिता ईशा राजानस्तेषां सस्वनं पूत्कारलक्षणशब्दं यस्मिन् तत् प्रतापेट् शम्। अर्थात् संतापितशत्रुभूप आधिक्यशब्दजनितसुखम्। तेषां पूत्कारजनितसुखमित्यर्थः।
4. पुनः कथं भूतं शं प्रतापेट् शं प्र इति तृप्तौ प्र इति तृप्तीकृताः संतापितशत्रुराजानस्त एव शूद्रा यस्मिन् तत् प्रतापेट्शम्। अर्थात् श्रीमत्प्रतापाद्ये केचित् शत्रुभूपाराजान् त्वं परिहाथ शूद्रवक्कृषिकर्मकरास्तेषा तृप्तिकरणात्सुखमित्यर्थः।
5. पुनः कथं भूतं शं प्रतापेट्शम्। प्र इति शुद्धौ। प्र इति शुद्धिरूपः संतापिशत्रुभूपानां श इति वसुधारककोष्टागारगृहं यस्मिन् तत् प्रतापेट्शम्। अर्थात् शत्रुभूपानां शक्तिस्त्वया शान्ततां नीता तदुत्थं सुखमित्यर्थः।
6. पुनः कीदृशं शं प्रतापेट्शम्। प्र इति अग्रपूजायां पूर्वं ये शत्रवः पश्चात् भवत्कोपात्प्राक् श्रीमच्चरणसपर्यामायातास्तेषां प्र इति अग्रपूजाधारकाणां संतापितशत्रुभूपाणां शी इति सुखरूपशयनं यस्मिन् तत् प्रतापेट्शम्। अत्र डकारस्तु बहुव्रीहौ इति वचनात्। डकारबलात् टिलोपकरणादीकारलोपः अर्थात् यैः पूर्वं तव पूजाप्राभृतमकारिषत त एव सुखनिद्रया शेरते इति भावः।
7. पुनः किं विशिष्टं शम्। प्रतापेट्शं प्र इति शान्तौ शान्तिं प्रापितः तापेशां शत्रुराज्ञांश्या इति मरणेन यस्मिन् तत् प्रतापेट्शम्। अर्थात् शत्रुराज्ञां मरणेन शान्तिर्जाता तदुत्थं सुखमिति भावः।
8. पुनः कथं भूतं शं प्रतापेट्शम्। प्र इति आद्यकर्मणि त्वत्सैन्यचढनात् प्राक् ये तापेशाः शत्रुभूपाः नष्टास्तेशे इति वाल्मीके प्रविष्टा यस्मिन् तत् प्रतापेट्शम् अर्थात् त्वन्नामग्रहणात्सैन्योपरिगमनाद्वा शत्रुभूपाः पलायिता यथा सर्पोभयकम्पितो वाल्मीके प्रविष्टस्मन् न दृश्यते तथा तेषां नाम न ज्ञायते तदुत्थं सुखमित्यर्थः।
9. पुनः किं विशिष्टं शं प्रतापेट्शम्। प्र इति उदीर्णे उदीर्णा मरणेन मृताः संग्रामे खड्गाग्रेण मृत्युं गताः शत्रुराजानस्तैः श इति शिवः कल्याणो यस्मिन् तत् प्रतापेट्शम्। अर्थात् भवता योद्धारः संग्रामे शत्रुराजानः खड्गाग्रेण मारिता तस्मात्तव भद्रं जातमिति भावः। अथवा। प्र इति उदीर्णामरणेन मृतो यो दोलति रामाख्यो वणिक्सुतः श्रीमत्प्रधानस्तेन संतापितशत्रुभूपादाक्षिणात्यास्तस्मात् शं शिवं भद्रं कल्याणं यस्मिन् सुखे तदुत्थं सुखमित्यर्थः।
10. पुनः किं विशिष्टं शं प्रतापेट्शम्। प्र इति संभवे। प्र इति उत्पत्त्या तापेन उद्दीपिता ये ईशाः राजानस्ते तापेशः तेषां श इति कूर्मे कूर्मवंशे प्रतापेट्शे यस्मिन् तत् प्रतापेट् शम्। अर्थात् निजोत्पत्याकूर्मवंशराजान उद्दीपिताः श्रीमतातदुत्थं सुखमित्यर्थः।
11. पुनः कथं भूतं शं प्रतापेट्शम् ईशानां श इति ईशः भूपः ईट्शः प्र इति ऐश्वर्यस्तेन तापा इति तापिता ईट्शाः राजाधिराजामाधवाख्यो सिन्ध्यो दाक्षिणात्यो म्लेच्छेशो दिल्लीपतिप्रमुखो यस्मिन् तत् प्रतापेट्शम्। अर्थात् निजविभूतिदर्शनेन विडांबितदाक्षिणात्येशो म्लेच्छेश्वरो वा इति भावः।

12. पुनः कथं भूतं शं प्रतापेट्शं प्र इति दृष्टार्थे प्र इति दर्शिताः तापेशः तापितशत्रुभूपाः शा इति शिष्या इव यस्मिन् तत्। अर्थात् श्रीमतः प्रतापात् शत्रुभूपागुरुणां शिक्षा इव आज्ञावशवर्त्तिनः सन्तीति।

13. पुनः कथं भूतं शं प्रतापेट्शं प्र इति अभिलाषार्थे। प्र इति अभिलाषारूपः तापन प्रतापेन ईट् तस्य भवतः श इति तनुर्मूर्त्तिर्यस्मिन् तत् एतावता। श्रीमद्दर्शनेन जीवानां तृप्तिर्न भवति यदा यदा तव सैन्यं सौधबाह्यं निस्सरति तदा सर्वे जनाः संभूय उपरोपरि अभिलाषत्वेन दर्शनार्थमटन्ति इति भावः।

14. पुनः कथं भूतं शं प्रतापेट्शम्। प्र इति मङ्गलार्थे प्र इति मङ्गलरूपाश्च तास्तापा इति उद्योतरूपाश्च ता ईश इति ऐश्वर्यरूपाश्च ता शियः इति नानायान महायानशिविकानरवाहनचतुष्पालादयो यस्मिन् तत् प्रतापेट्शम्। अत्रायं भावः। दृश्यमानजीवानां नानाविधसुखोत्पादनकरा शिविका दृश्यन्ते इति भावः।

**नियोगे वियोगे भृशार्थे च तृप्तौ तथा शुद्धिशक्त्यग्रपूजासुशान्तौ।**
**वदन्त्याद्यकर्मण्युदीर्णे प्रसंज्ञस्तथा संभवैश्वर्यदृष्टाभिलाषे।।1।।**

**इत्युपसर्गोर्थवृत्तौ।**

**तथा प्रशब्दश्चाथ शब्दश्च द्वावेतौ ब्रह्मणाः पुराः।**

**कण्ठभित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।2।।**

शोकेस्तष्चे स्वने पुंसिशः शूद्रे वसुधारकेशा तु शान्ते च साम्रायांशीशये मरणेऽपि च।

शोवाल्मीके शिवे कूर्मभूपे शिष्ये तनौ कृतौ।।

शिः शंभौ शिविका तयोरिति कालिदासकृतैकाक्षर्याम्।

इति अनुष्टुप्छन्दो युग्मश्लोकस्य टीकापक्षार्थः।।

यरौत्मौयौयदाश्चिछित्स्फुरत्येवाहगम्भीरम्।

गम्भीरछन्दः षोडशाक्षरपद्यात्।।

**।। इति सुखपक्षार्थः।।**

**श्रीमच्छ्रीजयसिंहभूपतनयो भून्माधवादिर्हरि-**

**स्तस्माद्योजनि विश्वराजमुकुटालङ्कारभूतो भुवि।**

**तस्य श्रीशप्रतापसिंहनृपतेः काव्ये प्रतापाद्वये**

**श्रीभट्टारकदेवशक्रयकृते षड्युग्मसर्गो गतः।।26।।**

**।। इति श्रीप्रतापकाव्यऽे षड्विंशतितमः सर्गः।।26।।**

**सहायकाचार्यः, व्याकरणविभागः,**
**जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**